अश्मरी क्षपयत्याशु सिकताशर्करान्विता ॥ गर्भकोषपरासङ्गो मक्कल्लो योनिसंवृतिः । हन्यात् स्त्रियं मूढगर्भं यथोक्ताश्चाप्युपद्रवाः ॥ पार्श्वभङ्गान्नविद्वेषशोफातिसारपीड़ितम् । विरिक्तं पूर्य्यमाणञ्च वर्ज्जयेदुदरार्दितम् । यस्ताम्यति विसंज्ञश्च शेते निपतितोऽपि वा । शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥ यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् । नित्यं वक्त्रेण चोच्छ्वसेत् तं ज्वरो हन्ति मानवम्॥ हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोचनम् । सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥ आविलाक्षं प्रताम्यन्तं निद्रायुक्तमतीव च । क्षीणशोणितमांसञ्च नरं क्षपयति ज्वरः ॥ श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितम् । विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥ शुक्राक्षमनद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितम् । कृच्छ्रेण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥ श्वासशूलपिपासान्नविद्वेषग्रन्थिमूढ़ताः । भवन्ति दुर्बलत्वञ्च गुल्मिनोऽमृत्युमेष्यतः ॥ आध्मानं बद्धनिष्यन्दं छर्दिहिक्कातृड़न्वितम् । रुजाश्वाससमाविष्टं विद्रधिर्नाशयेन्नरम् ॥ पाण्डुदन्तनखो यस्य पाण्डुनेत्रश्च मानवः । पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति ॥ लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्षणः । रक्तानाञ्च दिशां द्रष्टा रक्तपित्ती विनश्यति॥ अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः । जागरिष्णुरसन्देहमुन्मादेन विनश्यति ॥ बहुशोऽपस्मरन्तन्तु प्रक्षीणं चलितभ्रुवम्। नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्"॥

**अवारपार** पु० अवारमर्वाक्तीरं पारञ्चोत्तरतीरं च स्तो यस्य अर्शआद्यच्। उभयकूलवति समुद्रे ।

**अवारपारीण** त्रि० अवारपारे गच्छति+ख । पारगामिनि।

**अवारिका** स्त्री नास्ति वारि यत्र । धन्याके, तस्य अतिशुष्कत्वेन जलशून्यत्वात्तथात्वम् ।

**अवारित** त्रि० न वारितः । अनिषिद्धे "ग्रामेषु सैन्यैरकरोदवारितः" माघः । [गन्तरि ।

**अवारीण** त्रि० अवारं गच्छति ख । नद्यादेरर्व्वाक्पार

**अवार्य्य** त्रि० न वार्य्यः ।अवारणीये। "उपद्रवैस्तु ये जुष्टा व्याधयो यान्त्यवार्य्यताम्" सुश्रु० ।

**अवावट** पु० "द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते । अवावट इतिख्यातः शूद्रधर्म्मा स जातितः"स्मृत्युक्ते कुण्डगोलकादौ ।

**अवावन्** त्रि० ओण्-अपसारणे ङ्वनिप् । अपसारके । स्त्रियां ङीप् वनोरश्च । अवावरी ।

**अवासस्** त्रि०न वासोऽस्य। १वस्त्ररहिते नग्ने २बौद्धभेदे च।

**अवासिन्** त्रि० न वसति वस-णिनि न० त० । निवासशीलभिन्ने । स्त्रियां ङीप् ।

**अवास्तव** न० न वास्तवम् । सत्यभिन्ने मिथ्याभूते ।

**अवाह्य** त्रि० न० त० । वोढुमशक्ये ।

**अवि** पु० अव–इन् । १सूर्य्ये, २अर्कवृक्षे ३मेषे, ४छागे, "महान्त्यपि समृद्धानि गोजाविधनधान्यतः" जिनकार्म्मुकवस्तावी पृथक् दद्याद् विशुद्धये" इति च मनुः ५पर्व्वते, ६मूषिककम्बले, ७प्रभौ च । ८लज्जायां स्त्री वा ङीप् । स्वार्थे कन् । अविशब्दार्थे । भावादौ पुरोहिता० यक् । आविक्यम् तद्भावादौ न० ।

**अविकट** पु० अवि+समूहे कटच् ।१मेषसंघाते । विकट उग्रः न०त० । २उग्रभिन्ने सौम्ये त्रि० ।

**अविकटोरण** पु०अविकटे मेषसंघे देयः उरणःमेषः । नृपाय शुल्करूपेण देये मेषसंघातमध्ये मेषरूपे करे ।

**अविकत्थन** त्रि न०त० । श्लाघाशून्ये "सन्तुष्टाश्च क्षमायुक्ता भवेयुरविकत्थनाः" देवीपुरा० ।

**अविकल** त्रि०न विकलः व्याकुलः। १व्याकुलभिन्ने २अविसंवादिनि च "कलमविकलतालं गायकैर्बोधहेतोः" माघः "अविकलोऽविसंवादी" मल्लि० ।

**अविकार** पु० अभावे न०त० । विकाराभावे न०ब० । विकारशून्ये । विकारश्च परिणामभेदः भावधर्म्मः ।

**अविकार्य्य** त्रि०नविकार्य्यः। १विकार्य्यभिन्ने परिणामिगुणशून्ये "अविकार्य्योऽयमुच्यते" गीता । विकार्यञ्च द्वेधा "प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् । किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्" इति वाक्यप० उक्तं ग्राह्यम् याद्दशवस्तुनश्च विकार्यकर्मत्वम् तद्भिन्ने २पदार्थे परात्मनस्तु तदुभयाभावात् सर्वथाऽविकार्यत्वमेव ।

**अविकृत** त्रि०न विकृतः । परिणामिगुणशून्ये ।

**अविकृति** स्त्री अभावे न०त०।१विकाराभावे न०ब०२विकारशून्ये च । "३सांख्योक्तायां मूलप्रकृतौ स्त्री "मूलप्रकृतिरविकृतिः" सा० का० ।

**अविक्रिय** त्रि० नास्ति विक्रिया यस्य । विकारशून्ये ।

**अविक्रीत** त्रि० न विक्रीतः । विक्रीतस्याऽपि कालविशेषमध्ये पुनः प्रत्याहर्त्तुं शक्ये द्रव्यभेदे।तत्र कालनियमो यथा"क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहं तद्द्रव्यं दद्याच्चैवाददीत वा" मनुः । क्रीतानुशयकालवत् द्रव्यविशेषे विक्रयानुशयकालविशेषोग्राह्यः। 'दशैकपञ्चस-